अज्ञो जन्तुरनीशश्च भाजनं सुखदुःखयोः । [25]
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ।
प्रधानं पुरुषं चैव आत्मानं सर्वदेहिनाम् ।
मनसा विषयं चैव चेतनेन प्रचोदिताः ।
सुखदुःखेन युज्यन्ते कर्मभिश्च प्रचोदिताः ।
वर्णाश्रमविभागश्च ईश्वरेण प्रवर्तितः । [30]
सदेवासुरगन्धर्वं तेनेदं निर्मितं जगत् ।
त्वं चान्ये च महाराज ईश्वरस्य वशे स्थिताः ।
जीवन्ते च म्रियन्ते च न स्वतन्त्राः कथंचन ।
हित्वा हित्वा च भूतानि हत्वा सर्वमिदं जगत् ।
यजते कर्मणा देवं न स पापेन लिप्यते । [35]
हिंसात्मकानि कर्माणि सर्वेषां गृहमेधिनाम् ।
देवतानामृषीणां च ते च यान्ति परां गतिम् ।
पातिताः शत्रवः पूर्वं सर्वत्र वसुधाधिपैः ।
प्रजानां हितकामैश्च आत्मनश्च हितैषिभिः ।

1

(L. 3) G_1 $M_{2.4}$ च (for the first न). T_2 न नक्षत्राणि (by transp.). —(L. 4) G_2 M_2 स्पर्शं च. G_4 रूपश्च. —(L. 5) T_2 प्रबोध्यते; G_1 प्रवाध्यते. —(L. 7) D_7 नार्थापत्ति. G_1 M_2 न वैतिह्यं; G_3 न चैतीहं. M_4 अर्थापत्तिस्तथैतिह्यं (for the prior half). M_3 दृष्टातो (for दृष्टान्तो). D_7 G_1 न दृष्टांतो न सं°. —(L. 8) G_1 M_2 वापि (for राजन्). G_2 न धर्मो. —(L. 9) D_7 तिर्यंच; M_2 न तिर्यक् (for तिर्यक्च). G_1 om. the first च. —(L. 10) G_1 -विभागं च. D_7 T G_1 कामकृत्. —(L. 11) G_2 चार्थाश्च; $M_{1.3.4}$ चार्थस्य. —(L. 12) D_7 G_1 M अनालोक्यं. —(L. 13) D_7 G_3 इच्छति; M_2 ऋच्छसि. —(L. 14) T_1 $G_{3.4}$ पुनस् (for मनस्). $M_{1.3}$ चासीद् (for त्वासीद्). G_1 वै तु (for एव). G_2 सनातनः (for सचे°). —(L. 15) G_3 गहिनीकृतं. —(L. 16) G_1 M_2 च वेदना; M_4 सचेतना (for च चे°). $M_{1.3}$ योमिताः (for योजिताः). —(L. 17) M_2 ये (for ते). D_7 ते चारब्धा विश्वसृजो (for the prior half). D_7. नार्षयो (for ऋषयो). —(L. 18) D_7 ब्रह्मांडांतैर्. —(L. 19) G_1 निर्ममः; Cv निर्मितं (for निर्मितः). —(L. 20) M_2 इष्टिस्. D_7 समारब्धात्; M_1 समालब्धा. M हि (for च). —(L. 21) G_1 ईश्वरस्येदं; Cv °स्यैतद् (as above). D_7 नेतीदं (for येनेदं). $G_{1.2}$ सचेतनमिदं जगत् (for the post. half). —(L. 23) G_1 संयुगे (for संक्षये). —(L. 26) D_7 T $G_{1.4}$ M_2 -प्रेषितो. —(L. 27) T_1 $G_{3.4}$ पुरुषश् (for °षं). G_1 स्वस्य (for सर्व-). —(L. 28) D_7 G_3 विषयैश्; G_1 M_4 °याश्; M_2 °यांश् (for °यं). T_1 $G_{3.4}$ प्रयोजिताः; G_2 प्रयोजितः; M_{1-3} प्रचोदितः. — D_7 om. (hapl.) line 29. —(L. 29) $M_{2.4}$ स्वैः (for च). —(L. 32) D_7 त्वं चाचैव. G_3 महाभाग (for °राज). D_7 स्थितः. —(L. 33) D_7 G_1 M_{1-3} जीवंत्येते (for °न्ते च). D_7 T_1 $G_{3.4}$ मृयंते; T_2 G_1 भ्रियंते. —(L. 34) D_7 हत्वा हत्वा; $G_{1.2}$ भित्त्वा भित्त्वा; $M_{1.3}$ हित्वा भित्त्वा; $M_{2.4}$ छित्त्वा भित्त्वा (for हित्वा हित्वा). T_1 हित्वा; G_2 हुत्वा (for हत्वा). —(L. 35) D_7 यतते; T_1 G_3 यजंते. T_1 G_3 M_2 देवान्; T_2 $G_{1.2}$ यो वै (for देवं). —(L. 37) D_7 G_2 M देवानां च (for देवतानाम्). D_7 G_1 M ते च नाके (D_7 तेन चान्ये; G_1 ते चान्ये च) प्रतिष्ठिताः (for the post. half). —(L. 38) D_7 सर्वथा (for °त्र). —(L. 39) D_7 G_4 हितकाम्यैश्. D_7 $G_{3.4}$ आत्मानश्च,

यदि तत्र भवेत्पापं कथं ते स्वर्गमास्थिताः । [40]
न प्राप्ता नरकं राजन्वेष्टिताः पापकर्मभिः ।

2

After 12. 14. 14, D_7 S ins.:

सदेवासुरगन्धर्वैरप्सरोभिर्विभूषितम् ।
रक्षोभिर्गुह्यकैर्नागैर्मनुष्यैश्च विभूषितम् ।
त्रिवर्गेण च संपूर्णं त्रिवर्गस्यागमेन च ।
दण्डेनाभ्याहृतं सर्वं जगद्भोगाय कल्पते ।
स्वयंभुवं महीपाल आगमं शृणु शाश्वतम् । [5]
विप्राणां विदितश्चायं तव चैव विशां पते ।
अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य लोकस्य राजानमसृजत्प्रभुः ।
महाकार्यं महावीर्यं पालने जगतः क्षमम् ।
अनिलाग्नियमार्काणामिन्द्रस्य वरुणस्य च । [10]
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ।
यस्मादेषां सुरेन्द्राणां संभवत्यंशतो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ।
तपत्यादित्यवच्चैव चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् । [15]
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमश्च धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रतापवान् ।
पितामहस्य देवस्य विष्णोः शर्वस्य चैव हि ।
ऋषीणां चैव सर्वेषां तस्मिंस्तेजः प्रतिष्ठितम् ।
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः । [20]
महती देवता ह्येषा नररूपेण तिष्ठति ।
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ।
धृतराष्ट्रकुलं दग्धं क्रोधोद्भूतेन वह्निना ।
प्रत्यक्षमेतल्लोकस्य संशयो न हि विद्यते । [25]
कुलजो वृत्तसंपन्नो धार्मिकश्च महीपतिः ।
प्रजानां पालने युक्तः पूज्यते दैवतैरपि ।
कार्यं योऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं वैश्वरूप्यं पुनः पुनः ।
तस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे । [30]
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ।
तं यस्तु द्वेष्टि संमोहात्स विनश्यति मानवः ।
तस्य ह्याशु विनाशाय राजापि कुरुते मनः ।
तस्माद्धर्मं यमिष्टेषु स व्यवस्यति पार्थिवः ।
अनिष्टं चाप्यनिष्टेषु तद्धर्मं न विचालयेत् । [35]
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ।
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते धर्मान्न विचलन्ति च ।
देशकालौ च शक्तिं च कार्यं चावेक्ष्य तत्त्वतः । [40]
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ।

— (L. 40) G_4 (*inf. lin.* as above) स्वर्गगामिनः. — (L. 41) D_7 Cv प्राप्तं. D_7 द्वेषिताः; G_1 ये भीताः (for वेष्टिताः).

2

(L. 1) M साप्सरोभिर्. — After line 1, D_7 repeats 12. 14. 10 [v. l. -द्विपान् for -गजान्]. — (L. 5) T_2 G_1 स्वयं मम; G_2 $M_{1.3.4}$ स्वायंभुवं. — (L. 6) D_7 T_1 वंदितश्. — Lines 7–8 = Manu. 7. 3. — (L. 7) M च (for हि). D_7 G_4 विद्रुतो. — (L. 8) M सर्वस्य (for लोक°). D_7 विराजम् (for राजानम्). — Lines 10–17 = (var.) Manu. 7. 4–7. — (L. 11) T_2 रुद्र-; G_1 इंद्र- (for चन्द्र-). D_7 G_4 -विष्णवीश°. T_2 G_1 मात्रां निर्भिद्य (T_3 मात्रा निर्विद्य) शाश्वतीं; Cv as above. — (L. 12) G_1 $M_{1.2}$ नरेंद्राणां. D_7 $M_{1.3}$ [अं]शको. D_7 नृप. — (L. 14) D_7 प्रेष्ठ (for चैव). — (L. 15) D_7 चैवं. T_2 G_1 अभि- (for भुवि). G_3 इति (for अपि). — (L. 18) D_7 सर्वस्य (for श°). — Lines 20–23 = Manu. 7. 8–9. — (L. 20) T_2 G_1 देवांश (for मनुष्य). — (L. 22) D_7 एतदेव; $M_{1.3}$ एक एव. D_7 हत्यसमर्पणं (sic); T_1 $G_{3.4}$ दुरुपसर्पणं. — (L. 24) T_2 G_1 दग्ध्वा; G_2 दग्धुं (for दग्धं). T_2 G_1 क्रोधोद्धतेन. — (L. 25) T_2 G_1 एव (for एतल्). D_7 T_2 G_1 $M_{2.4}$ हि न (by transp.); $M_{1.3}$ [ऽ]पि न. — (L. 26) D_7 G_4 व्रत- (for वृत्त-). — (L. 27) M_{1-3} रक्तः (for युक्तः). — Lines 28–77 = (var.) Manu. 7. 10–33. — (L. 28) M सो (for यो). — (L. 29) D_7 वैरूप्यं च; T_2 G_1 Cv वैश्वरूपं. — (L. 30) T_2 G_1 पद्म- (for तस्य). D_7 पराक्रमः; Cv °क्रमे (as above). — (L. 32) G_3 यस्तु तं (by transp.). T_2 G_1 वै (for सं-). — (L. 33) T_2 G_1 हि (for [अ]पि). — (L. 34) T_2 G_1 M_2 यदिष्टेषु. D_7 corrupt; G_3 सुव्यवस्यति; M सं($M_{1.3}$ स)व्यवस्येत (M_4 °व). — (L. 35) D_7 अरिष्टश्; $G_{3.4}$ अरिष्टं; M_1 अनिष्टा; M_2 अनिष्टश्. T_1 वापि; $G_{2.4}$ नापि (for चापि). $M_{2.4}$ तं धर्मं. D_7 च (for वि-). $M_{1.3}$ Cv विचारयेत्. — (L. 36) $G_{2.3}$ धर्म्यम्. — (L. 37) G_3 उत्सृजत्. — (L. 38) T_2 G_1 भूतानि सर्वाणि (by transp.). — (L. 39) D_7 कल्प्यंते. G_4 चलयंति (for विचलन्ति).

स राजा पुरुषो दण्डः स नेता शासिता च सः ।
वर्णानामाश्रमाणां च धर्मप्रभुरथाव्ययः ।
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः । [45]
सुसमीक्ष्य धृतो दण्डः सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवाधक्ष्यन्दुर्बलान्बलवत्तराः ।
काकोऽद्याच्च पुरोडाशं श्वा चैवावलिहेद्धविः । [50]
स्वामित्वं न क्वचिच्च स्यात्प्रपद्येताधरोत्तरम् ।
सर्वो दण्डजितो लोको दुर्लभस्तु शुचिर्नरः ।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ।
देवदानवगन्धर्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैवाभिपीडिताः । [55]
दूष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ।
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ।
आहुस्तस्य प्रणेतारं राजानं सत्यवादिनम् । [60]
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ।
तं राजा प्रणयन्सम्यक्स्वर्गायाभिप्रवर्तते ।
कामात्मा विषयी क्षुद्रो दण्डेनैव निहन्यते ।
दण्डो हि सुमहातेजा दुर्धरश्चाकृतात्मभिः ।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् । [65]
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरम् ।
अन्तरिक्षगतांश्चैव मुनीन्देवांश्च हिंसति ।
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
अशक्यो न्यायतो नेतुं विषयांश्चैव सेवता ।
शुचिना सत्यसंधेन नीतिशास्त्रानुसारिणा । [70]
दण्डः प्रणेतुं शक्यो हि सुसहायेन धीमता ।
स्वराष्ट्रे न्यायवर्ती स्याद्भृशं दण्डश्च शत्रुषु ।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ।
एवंवृत्तस्य राज्ञस्तु शिलोञ्छेनापि जीवतः ।
विस्तीर्येत यशो लोके तैलबिन्दुरिवाम्भसि । [75]
अतस्तु विपरीतस्य नृपतेरकृतात्मनः ।
संक्षिप्येत यशो लोके घृतबिन्दुरिवाम्भसि ।
देवदेवेन रुद्रेण ब्रह्मणा च महीपते ।
विष्णुना चैव देवेन शक्रेण च महात्मना ।
लोकपालैश्च भूतैश्च पाण्डवैश्च महात्मभिः । [80]
धर्माद्विचलिता राजन्धार्तराष्ट्रा निपातिताः ।
अधार्मिका दुराचाराः ससैन्या विनिपातिताः ।
तान्निहत्य न दोषस्ते स्वल्पोऽपि जगतीपते ।
छलेन मायया वाथ क्षत्रधर्मेण वा नृप ।

3

D_7 S ins. after 12. 14. 35 (D_7 T_2 G_1, after 14*):

—(L. 40) D_7 चापेक्ष्य. —(L. 41) G_1 यथाहतं; $M_{1.3}$ यथागतं (for °हृतः). M_{1-3} अन्यायवृत्तिषु (for °वर्तिषु). —(L. 42) D_7 च यः (for च सः). —(L. 44) G_1 हि (for [अ]भि-). —(L. 45) G_1 दक्षः (for दण्डः). —(L. 46) G_1 सुतो (for धृतो). —(L. 47) D_7 सुसमीक्ष्याप्रणीतस्तु (for the prior half). G_2 सर्वशः. —(L. 48) $G_{1.3}$ दंड्यं (for दण्डं). —(L. 49) = (var.) 12. 15. 30^{cd}. D_7 T $G_{1.2.4}$ जले (for शूले). D_7 [अ]पक्ष्याद्; T_2 G_1 [अ]भक्ष्यन्; G_{2-4} [अ]धक्ष्य(G_3 °क्ष्या)द्. D_7 G_{2-4} बलवत्तरः. —(L. 50) = (var.) 12. 15. 45^{cd}. D_7 काकोद्यं च. G_1 चैवालीलहेद्; G_4 चैव च लिहेद्. —(L. 51) G_1 स्वामी वै. G_4 M_3 [अ]धरोत्तमं. — Lines 52–53 = (var.) 12. 15. 34. —(L. 52) D_7 दंडे (for दण्ड-). T_2 G_1 सर्वे दंडजिता लोका. T_2 $G_{1.2}$ दुर्बलस्तु. —(L. 53) G_1 दंडस्यैव (for °स्य हि). —(L. 55) D_7 ते विभेयतु (sic); T_2 G_1 तेषां भोगाय. M_3 कल्प्यंते. —(L. 56) D_7 M_4 दुष्येयुः. D_7 भिद्येयुः (for °रन्). M_4 सर्वतेवसः (sic). —(L. 57) T_2 G_1 सर्वकाल-. —(L. 59) M_2 प्रशास्. M_4 मुष्यंति.

—(L. 61) D_7 $M_{1.3}$ -कारणं (for °कारिणं). —(L. 62) D_7 प्रणयेत्; G_3 °यात् (for °यन्). $M_{1.3.4}$ [अ]भिप्रकल्पते. —(L. 63) M विषये (for °यी). G_1 क्रुद्धो. D_7 $M_{2.4}$ वि-; G_2 हि (for नि-). —(L. 64) M सुमहत्तेजो (for सुमहातेजा). M दुर्धार्यश् (for दुर्धरश्). —(L. 65) T_2 G_1 प्रचलितं. —(L. 67) D_7 मुनि-; G_1 M_2 मुनिं (for मुनीन्). —(L. 68) G_1 मूढेन. —(L. 69) M न शक्यो. D_7 दंडो (for नेतुं). D_7 M चाति- (for चैव). —(L. 71) G_1 दंडः प्रणिहितुं शक्यो (for the prior half). $M_{1.3.4}$ ससहायेन. —(L. 72) G_1 M_2 सुराष्ट्रे. D_7 T_2 $G_{1.3}$ -वृत्तिः; M -वृत्तः (for -वर्ती). T_1 भृशः. —(L. 73) D_7 सुहृत्स्वधर्मसंधेषु (for the prior half). —(L. 74) $M_{1.3}$ जीवितः. —(L. 75) M विस्तीर्यते. G_1 तैलबिंदुम्. —(L. 77) M संक्षिप्यते. —(L. 79) D_7 देवदेवेन; G_4 [अ]पि च दे°. —(L. 81) T_2 विचरिता; $G_{1.2}$ M_2 विचलितो; M_1 हि चलितो; M_3 हि चलिता. —(L. 84) $G_{3.4}$ बलेन (for छलेन). G_1 चाथ. T_2 G_1 पुनः (for नृप).

धृतराष्ट्रसुता राजन्नित्यमुत्पथगामिनः ।
तादृशानां वधे दोषं नाहं पश्यामि कर्हिचित् ।
इमांश्चोशनसा गीताञ्श्लोकाञ्शृणु नराधिप ।
आत्महन्तार्थहन्ता च बन्धुहन्ता विषप्रदः ।
आथर्वणेन हन्ता च यश्च भार्यां परामृशेत् । [5]
निर्दोषं वधमेतेषां षण्णामप्याततायिनाम् ।
ब्रह्मा प्रोवाच भगवान्भार्गवाय महात्मने ।
ब्रह्मक्षत्रविशां राजन्सत्पथे वर्ततामपि ।
प्रसह्यागारमागम्य हन्तारं गरदं तथा ।
अभक्ष्यापेयदातारमग्निदं च निशातयेत् । [10]
मार्ग एष महीपानां गोब्राह्मणवधेषु च ।
केशग्रहे च नारीणामपि युध्येत्पितामहम् ।
ब्रह्माणं देवदेवेशं किं पुनः पापकारिणम् ।
गोब्राह्मणार्थे व्यसने च राज्ञां
राष्ट्रोपमर्दे स्वशरीरहेतोः । [15]
स्त्रीणां च विक्रुष्टरुतानि श्रुत्वा
विप्रोऽपि युध्येत महाप्रभावः ।
धर्माद्विचलितं विप्रं निहन्यादाततायिनम् ।
तस्यान्यत्र वधं विद्वान्मनसापि न चिन्तयेत् ।
गोब्राह्मणवधे वृत्तं मत्त्रत्राणार्थमेव च । [20]
न हन्यात्क्षत्रियो विप्रं स्वकुटुम्बस्य चात्यये ।
तस्करेण नृशंसेन धर्मात्प्रचलितेन च ।
क्षत्रबन्धुः परं शक्त्या युध्येद्विप्रेण संयुगे ।
आततायिनमायान्तमपि वेदान्तगं रणे ।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् । [25]
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यन्त्यजोऽथ वा ।
न हन्याद्ब्राह्मणं शान्तं तृणेनापि कदाचन ।
ब्राह्मणायावगुर्येत स्पृष्टे गुरुतरं भवेत् ।
वर्षाणां त्रिशतं पापः प्रतिष्ठां नाधिगच्छति ।
सहस्रं त्वेव वर्षाणि निहत्य नरके पतेत् । [30]
तस्मान्नैवापगुर्याद्धि नैव शस्त्रं निपातयेत् ।
शोणितं यावतः पांसून्गृह्णातीति हि धारणा ।
तावतीः स समाः पापो नरके परिवर्तते ।
त्वगस्थिभेदं विप्रस्य यः कुर्यात्कारयेत वा ।
ब्रह्महा स तु विज्ञेयः प्रायश्चित्ती नराधमः । [35]
श्रोत्रियं ब्राह्मणं हत्वा तथात्रेयीं च ब्राह्मणीम् ।
चतुर्विंशतिवर्षाणि चरेद्ब्रह्महणो व्रतम् ।
द्विगुणा ब्रह्महत्येयं सर्वैः प्रोक्ता मनीषिभिः ।
प्रायश्चित्तमकुर्वाणं कृताङ्कं विप्रवासयेत् ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं वा घातयेन्नृपः । [40]
ब्रह्मघ्नं तस्करं चैव मा भूदेवं चरिष्यति ।
छित्त्वा हस्तौ च पादौ च नासिकोष्ठौ च भूपतिः ।
ब्रह्मघ्नं चोत्तमं पापं नेत्रोद्धारेण योजयेत् ।
शूद्रस्यैष स्मृतो दण्डस्तद्वद्राजन्यवैश्ययोः ।
प्रायश्चित्तमकुर्वाणं ब्राह्मणं तु प्रवासयेत् । [45]
क्षत्रियं वैश्यशूद्रौ वा शस्त्रेणैव तु घातयेत् ।

3

(L. 1) D_7 -सुतान् (for -सुता). — (L. 2) G_3 वधं (for वधे). M_4 भारत (for कर्हिचित्). — (L. 3) M_1 लोकाञ्; M_4 शोकाञ् (for श्लोकाञ्). M महीपते (for नराधिप). — (L. 4) D_7 G_1 M आहंता चार्थहंता च (for the prior half). — (L. 5) D_7 आधर्मणेन; T_1 अथर्वणेन; T_2 आथर्वणनि-; G_3 अधर्मेण न; M_4 आथर्वेण न. — (L. 8) M_2 राजा (for °जन्). G_{2-4} वर्तिनामपि. — (L. 9) G_7 ह्याहारम्. G_2 यथा. — (L. 10) G_1 अभक्ष्यपेय-. D_7 G_1 निपातयेत्; M विशात° (for निशात°). — (L. 11) D_7 मार्गानेतान्; T_2 मार्गो नैष; G_1 मार्गो नैव; M मार्गनेता. — (L. 13) M_4 ब्राह्मणं (for ब्रह्माणं). — (L. 15) $M_{1.3.4}$ राष्ट्रावमर्दे. — (L. 17) G_2 वध्येत (for युध्येत). $M_{2.4}$ महानुभावः; $M_{1.3}$ °प्रभावं. — (L. 20) M -हिते (for -वधे). D_7 यत्तन्-; G_1 M_2 यत्तं; $M_{1.3}$ युक्तं. G_1 आंत्रत्राणनम्; G_2 आत्मत्राणार्थम्. M वा (for च). — (L. 21) T G_2 नि-; G_1 स (for न). D_7 विप्रः. T_2 G_1 चाप्तये; M वात्यये. — (L. 22) G_1 M_{1-3} प्रव्यथितेन (for प्रचलि°). — (L. 23) $M_{1.3}$ क्षत्रबंधुं. — (L. 24) D_7 -पारगं; G_3 -रंगणे (for -गं रणे). — (L. 25) M ब्रह्महा (for भ्रूणहा). — (L. 26) T_2 G_1 [ऽ]पि वा (for ऽथ वा). — With lines 28–29, cf. Manu. 4. 165. — (L. 28) D_7 corrupt; T_2 अवकुर्याद्यो; G_1 °गुर्याद्यो; M °गूर्यैव. T_2 स्पृष्ट्वा गुरुतरं महत् (for the post. half). — (L. 29) G_3 त्रिंशतं (for त्रिशतं). — (L. 30) T_1 M_3 सहस्रं चैव; T_2 °स्रमिव; G_{2-4} °स्राणि च. $M_{1.3}$ वर्माणां; $M_{2.4}$ वर्षाणां. M निपात्य. — (L. 31) With lines 32–33, cf. Manu. 4. 168. T_1 G_{2-4} तस्मै (for तस्मान्). D_7 T_2 G_1 $M_{2.4}$ नैवाव-. D_7 -गुह्यापि; T_2 -कुर्याद्धि; $G_{1.2}$ M -गूर्याद्धि. C^v न ब्राह्मणायावगुरेद् (for the prior half). M जातु (for शस्त्रं). — (L. 32) T_2 G_1 गृह्णाति हि धरागतान्; C^v गृह्णातीह धारुणान् (for the post. half). — (L. 33) T_2 G_1 च (for स). — (L. 34) $M_{1.3}$ यत् (for यः). $M_{1.3.4}$ कारयीत. — (L. 35) M_2 स इति ज्ञेयः. — (L. 37) M ब्रह्महण-. — (L. 38) T_1 $G_{3.4}$ महर्षिभिः. — (L. 39) M_2 ब्राह्मगं तु; C^v कृताङ्कं नि- (as above). — (L. 40) G_1 पातयेन्. $M_{1.3.4}$ नृप. — (L. 43) T_2

ब्रह्मघ्नान्ब्राह्मणान्राजा कृताङ्कान्विप्रवासयेत् ।
विकलेन्द्रियांस्त्रिवर्णांश्च चण्डालैः सह वासयेत् ।
तैश्च यः संपिबेत्कश्चित्स पिबन्ब्रह्महा भवेत् ।
प्रेतानां न च देयानि पिण्डदानानि केनचित् । [50]
कृष्णवर्णा विरूपा च निर्गीता लम्बमूर्धजा ।
दुनोत्यदृष्टा कर्तारं ब्रह्महत्येति तां विदुः ।
ब्रह्मघ्नेन पिबन्तश्च विप्रा देशाः पुराणि च ।
अचिरादेव पीड्यन्ते दुर्भिक्षव्याधितस्करैः ।
ब्राह्मणं पापकर्माणं विप्राणामाततायिनम् । [55]
क्षत्रियं वैश्यशूद्रौ च नेत्रोद्धारेण योजयेत् ।
दुर्बलानां बलं राजा बलिनो ये च साधवः ।
बलिनां दुर्बलानां च पापानां मृत्युरिष्यते ।
सदोषमपि यो हन्यादश्राव्य जगतीपतेः ।
दुर्बलं बलवन्तं वा स पराजयमर्हति । [60]
राजाज्ञां प्राड्विवाकं च नेच्छेद्यश्चापि निष्पतेत् ।
साक्षिणं साधुवाक्यं च जितं तमपि निर्दिशेत् ।
बन्धनान्निष्पतेद्यश्च प्रतिभूर्न ददाति च ।
कुलजश्च धनाढ्यश्च स पराजयमर्हति ।
राजाज्ञया समाहूतो यो न गच्छेत्सभां नरः । [65]
बलवन्तमुपाश्रित्य सायुधः स पराजितः ।
तं दण्डेन विनिर्जित्य महासाहसिकं नरम् ।
वियुक्तदेहसर्वस्वं परलोकं विसर्जयेत् ।
मृतस्यापि न देयानि पिण्डदानानि केनचित् ।
दत्त्वा दण्डं प्रयच्छेत मध्यमं पूर्वसाहसम् । [70]
कुलस्त्रीव्यभिचारं च राष्ट्रस्य च विमर्दनम् ।
ब्रह्महत्यां च चौर्यं च राजद्रोहं च पञ्चमम् ।
महान्ति पातकान्याहुर्ऋषयः पातकानि ह ।
युद्धादन्यत्र हिंसायां सुरापस्य च कीर्तने ।
महान्तं गुरुतल्पे च मित्रद्रोहे च पातकम् । [75]
न कथंचिदुपेक्षेत महासाहसिकं नरम् ।
सर्वस्वमपहृत्याशु ततः प्राणैर्वियोजयेत् ।
त्रिषु वर्णेषु यो दण्डः प्रणीतो ब्रह्मणा पुरा ।
महासाहसिकं विप्रं कृताङ्कं विप्रवासयेत् ।
साहस्रो वा भवेद्दण्डः काञ्चनो देहनिष्क्रयः । [80]
चतुर्णामेव वर्णानामेवमाहोशनाः कविः ।
नारीणां बालवृद्धानां गोः पाते च महामतिः ।
पापानां दुर्विनीतानां प्राणान्तं च बृहस्पतिः ।
दण्डमाह महाभाग सर्वेषां चाततायिनाम् ।
सर्वेषां पापबुद्धीनां पापं कर्मेह कुर्वताम् । [85]
धृतराष्ट्रस्य पुत्राणां दण्डो निर्दोष इष्यते ।
सौबलस्य च दुर्बुद्धेः कर्णस्य च दुरात्मनः ।
पश्यतां चैव शूराणां याहं द्यूते सभां तदा ।
रजस्वला समानीता भवतां पश्यतां नृप ।
वाससैकेन संवीता भवद्दोषेण भूपते । [90]
मा भूद्धर्मविलोपस्ते धृतराष्ट्रकुलक्षयात् ।
क्रोधाग्निना तु दग्धं च सपशुद्रव्यसंचयम् ।

G_1 M_2 ब्राह्मणं (for ब्रह्मघ्नं). G_2 नोत्तमं. — (L. 44) G_1 शूद्रस्यैव. — (L. 45) D_7 तु प्रसादयेत्; G_1 तु विवासयेत्; G_2 विप्रवा° (for तु प्रवा°). — (L. 46) G_2 वैश्यशूद्राणां; G_3 °शूद्रांश्च. T_2 च (for वा). T_1 कारयेत्; G_2 M_{1-3} पातयेत् (for घात°). — (L. 47) G_1 M ब्रह्मघ्नं ब्राह्मणं राजा (for the prior half). G_1 M कृतांकं (for °कान्). — (L. 48) Prior half hypermetric. D_7 G_1 त्रीन्वर्णांश्च; M तु त्रीन्वर्णाश्च्. — (L. 49) G_{2-4} संपिबन्. — (L. 50) D_7 $G_{3.4}$ प्रेतान्नं; $M_{1.3.4}$ मृतानां. — (L. 51) D_7 कृष्णायसातपत्रं च; M कृष्णवर्णा स्व(M_2 स)रूपा च; Cv कृष्णवर्णा असुरूपा (for the prior half). D_7 निर्णया; T_1 G_3 निर्नीता; T_2 निर्णताल्; G_1 निर्णयाल्; G_2 निर्णदा; $M_{1.3}$ निर्दंष्ट्रा; $M_{2.4}$ निर्नंष्ट्रा; Cv नर्मघ्ना (for निर्णीता). — (L. 52) D_7 दुनोमि (for °ति). T_2 M [अ]दृष्टा (M_2 °दुष्टा); Cv [अ]दृष्ट-. — (L. 58) D_7 उच्यते (for इष्यते). — (L. 59) T_2 G_1 आश्रयं (for अश्राव्य). G_3 जगतीपतिः. — (L. 60) D_7 तं (for वा). — (L. 63) T_2 G_1 बलिनां (for बन्धनान्). $M_{1.3}$ यं च. — (L. 64) T_2 G_1 राजन्वधम् (for पराजयम्). — (L. 66) D_7 T_1 $G_{3.4}$ अपाश्रित्य. G_1 साधु यस्त्व-; M साधु यो वा (M_2 यश्च). — (L. 69) M पुण्य- (for पिण्ड-). — (L. 72) D_7 शौर्यं (for चौर्यं). — (L. 73) G_3 तत्त्वदार्शिनः; M पातकादिह. — (L. 75) D_7 मित्रद्रोहेन; G_1 °द्रोहेण. — (L. 77) G_1 M [अ]स्य (for [आ]शु). — (L. 78) G_1 M_2 वर्षेषु (for वर्णेषु). G_3 [अ]यं (for यो). — (L. 79) D_7 कृतांगं; $G_{1.2}$ M_2 कृतांतं. — (L. 80) T_2 $G_{1.2}$ M_2 सहस्रो. G_1 M_2 देहनिष्क्रिया; G_2 °निष्क्रियः. — (L. 81) D_7 T_2 G_1 M अपि (for एव). $M_{1.3}$ [उ]शना. — (L. 82) T_1 गोपाते च; $G_{3.4}$ गोपतेश्च. — (L. 83) T_2 विप्राणां (for प्राणान्तं). — (L. 84) T_2 $G_{1.2}$ M_2 महाभागः. $M_{1.3}$ om. च. — (L. 85) D_7 पापकर्मैव; T_2 पापमेवेह. — (L. 86) D_7 T_1 $M_{1.3}$ उच्यते (for इष्यते). — (L. 88) G_{2-4} $M_{1.3.4}$ द्यूत-. $M_{2.4}$ इयां (for तदा). — (L. 89) T_2 तदा (also as above). — (L. 90) D_7 तावद्-; T_2 G_1 M तव (for भवद्-). — (L. 92) D_7 त्वद्दग्धं च; T_2 न दग्धं च; G_1 M_2 न दंडं च; $G_{3.4}$ तु दंडं च; G_3 [ए]व दंडं तत्; $M_{1.3.4}$ [अ]नुदग्धं च.

साहमेवंविधं दुःखं संप्राप्ता तव हेतुना ।
आदित्यस्य प्रसादेन न च प्राणैर्वियोजिता ।
रक्षिता देवदेवेन जगतः कालहेतुना । [95]
दिवाकरेण देवेन विवस्था न कृता तदा ।

4

After adhy. 12. 26, N (except D7) ins. :

अस्मिन्नेव प्रकरणे धनंजयमुदारधीः ।
अस्निनीततरं वाक्यमित्युवाच युधिष्ठिरः ।
यदेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति ।
न स्वर्गो न सुखं न श्रीर्निर्धनस्येति तन्मृषा ।
स्वाध्याययज्ञसंसिद्धा दृश्यन्ते बहवो जनाः । [5]
तपोरताश्च मुनयो येषां लोकाः सनातनाः ।
ऋषीणां समयं शश्वद्ये रक्षन्ति धनंजय ।
आश्रिताः सर्वधर्मज्ञास्तान्देवा ब्राह्मणान्विदुः ।
स्वाध्यायनिष्ठांश्च मुनीञ्ज्ञाननिष्ठांस्तथापरान् ।
बुध्येथाः संततं चापि कर्मनिष्ठान्धनंजय । [10]
ज्ञाननिष्ठेषु कार्याणि प्रतिष्ठाप्यानि पाण्डव ।
वैखानसानां वचनं यथा नो विदितं पुरा ।
अजाश्च पृश्नयश्चैव सिकताश्चैव भारत ।
अरुणाः केतवश्चैव स्वाध्यायेन दिवं गताः ।
अवाप्यैतानि कर्माणि वेदोक्तानि धनंजय । [15]
दानमध्ययनं यज्ञो निग्रहश्चैव दुर्ग्रहः ।
दक्षिणेन च पन्थानमर्यम्णो ये दिवं गताः ।
एतान्क्रियावतां लोकानुक्तवान्पूर्वमप्यहम् ।
उत्तरेण तु पन्थानं नियमाद्यं प्रपश्यसि ।
एते त्यागवतां लोका भान्ति पार्थ सनातनाः । [20]
तत्रोत्तरां गतिं पार्थ प्रशंसन्ति पुराविदः ।
संतोषात्स्वर्गगमनं संतोषः परमं सुखम् ।
तुष्टेर्न किंचित्परतः सा सम्यक्प्रतितिष्ठति ।
विनीतक्रोधहर्षस्य सततं सिद्धिरुत्तमा ।
अत्राप्युदाहरन्तीमा गाथा गीता ययातिना । [25]
याभिः प्रत्याहरेत्कामान्कूर्मोऽङ्गानीव सर्वशः ।
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।

— G3 om. (hapl.) lines 94–95. — (L. 94) M प्रसादाच्च. — M1. 3 om. (hapl.) the post. half of line 95 and the prior half of line 96.

4

D3 om. the ref. — (L. 1) Ś1 K V1 D1 तस्मिन् (for अस्मिन्). K2 D2. 3 एवं (for एव). K2 Da2 D2. 8 प्रकारेण (for प्रकरणे). — (L. 2) Ś1 युधिष्ठिरं. — Before line 3, B2 Da2 ins. युधिष्ठिर उवाच. — (L. 3) K3 D4 ऋते (for इति). — (L. 4) Dn नार्थो (for न श्रीर्). B1 [अ]पि (for [इ]ति). — (L. 5) D2. 3. 5 स्वाध्यायधर्मसंपन्ना (for the prior half). D1 मुच्यंते (for दृश्यन्ते). — (L. 6) Ś1 K1. 2 D1 तपोवंतश्च. — (L. 7) K5 अपीताः (sic) (for ऋषीणां). Da समयः. Ś1 K2. 3 यद्वद्; B2 Da सम्यग् (for शश्वद्). — (L. 8) D4 damaged. D1 प्रश्रिताः; D3 आश्रितात् (for आश्रिताः). K5 B5 Dn देवास्तान् (by transp.). K4 D1 ब्राह्मणा (for °णान्). — D4 om. line 9. — (L. 9) K3. 5 Dn1 D4 हि ऋषीन् (for च मुनीञ्). V1 B Da Dn2 D2. 5. 6. 8 स्वाध्यायनिष्ठा मुनयो (B2 Da ऋषयो) (for the prior half). V1 B Da Dn2 D3. 5. 6 ज्ञाननिष्ठास्तथापरे (for the post. half). — (L. 10) V1 B Da2 सततं (for संततं). K5 B0–2. 4. 5 D2. 4. 8 धर्मनिष्ठान्; D6 कर्मनिष्ठा (for °निष्ठान्). Da धनंजयः. — (L. 11) Ś1 K1. 2. 4 B Da D1–6. 8 क(Ś1 K1. 2 B1 का)र्याणि (for कार्याणि). B2 Da भारत (for पाण्डव). — (L. 12) K3. 5 V1 B0. 1. 3–5 Dn D2–6. 8 प्रभो ; B2 Da तथा (for पुरा). — (L. 13) K2 प्रजाश् (for अ°). K4 सिकताश्; K5 वृष्णयश्; B2 D6 पृष्ण°; B5 प्रश्न° (for पृश्न°). Da अश्वजापृश्नया(Da2 °श्नमा)-श्चैव (sic) (for the prior half). — (L. 14) V1 केतकाश्; Da केशवश् (for केतवश्). Ś1 K1. 4. 5 D1 चापि (for चैव). — (L. 15) V1 कार्याणि (for कर्माणि). Ś1 K1. 4 D1 यथोक्तानि (for वेदोक्तानि). — Ś1 K1 D1 om. line 16. — (L. 16) K3 जज्ञं; D4 यज्ञं (for यज्ञो). K3 Da D4 निग्रहं. K3–5 V1 B Da D2–6. 8 दुष्करः (K3 D4 °रं) (for दुर्ग्रहः). — (L. 17) K2 Dn तु (for च). D4 अर्यम्णा. Ś1 K1. 2. 4 V1 D1 परं (for दिवं). — (L. 18) K3 Da D4 एते (for एतान्). D4 लोका (for लोकान्). K4 अर्थवान् (for उक्त°). B1 अव्ययं (for अप्यहम्). — (L. 19) Ś1 K1. 4 D1 आश्रित्यैव; B1 नियमार्थं; Da विषमाद्यं (for नियमाद्यं). K4 प्रपद्यसि; B0 प्रशंसति; Da Dn2 D2. 6 प्रपश्यति; D4 प्रशंस्यति (for प्रपश्यसि). — (L. 20) K2. 5 B4 Dn2 D1. 8 यागवतां; V1 B0. 1. 3 (marg.) योगवतां; B3 क्रिया°; Da [ऽ]भ्यास° (for त्याग°). Da संति (for भान्ति). — (L. 22) D5 संतोषः. Dn स्वर्गमाप्नोति. — (L. 23) K1. 4 तुष्टेन्न; K2 तुष्येन्न; V1 B0. 1. 3–5 तुष्ट्या न; Da तुष्टा न; D1 तुष्टिं न; D4. 8 तुष्टेन (for तुष्टेर्न). K5 Dn परमं; D4 परतरं (hypermetric) (for परतः). Ś1 K1. 4 D1 यस्य (for सम्यक्). — (L. 24) V1 B0. 1. 3–5 Dn2 D8 क्रोधहर्षविनीतस्य; B2 Da हर्षक्रोधविनीतस्य (for the prior half). B1 सिद्धिसत्तम; D8 बुद्धिरुत्तमा (for सिद्धि°).

यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ।
यदा न भावं कुरुते सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा । [30]
विनीतमानमोहस्य बहुसङ्गविवर्जिनः ।
तदात्मज्योतिषः साधोर्निर्वाणमुपपद्यते ।
इदं तु श्रृणु मे पार्थ ब्रुवतः संयतेन्द्रियः ।
धर्ममन्ये वृत्तमन्ये धनमीहन्ति चापरे ।
धनहेतोर्य ईहेत तस्यानीहा गरीयसी । [35]
भूयान्दोषो हि वित्तेषु यश्च धर्मस्तदाश्रयः ।
प्रत्यक्षमनुपश्यामस्त्वमपि द्रष्टुमर्हसि ।
वर्जनं वर्जनीयानामीहमानेन दुष्करम् ।
ये वित्तमभिपद्यन्ते सम्यक्तेषु सुदुर्लभम् ।
द्रुह्यतः प्रैति तत्प्राहुः प्रतिकूलं यथातथम् । [40]
यस्तु संभिन्नवृत्तः स्याद्वीतशोकभयो नरः ।
अल्पेन तृषितो द्रुह्यन्भ्रूणहत्यां न बुध्यते ।
दुष्यन्त्याददतो भृत्या नित्यं दस्युभयादिव ।
दुर्लभं च धनं प्राप्य भृशं दत्त्वानुतप्यते ।
अधनः कस्य किं वाच्यो विमुक्तः सर्वतः सुखी । [45]
देवस्वमुपगृह्यैव धनेन न सुखी भवेत् ।
अत्र गाथां यज्ञगीतां कीर्तयन्ति पुराविदः ।
त्रयीमुपाश्रितां लोके यज्ञसंस्तरकारिकाम् ।
यज्ञाय सृष्टानि धनानि धात्रा
यज्ञाय सृष्टः पुरुषो रक्षिता च । [50]
तस्मात्सर्वं यज्ञ एवोपयोज्यं

—(L. 25) K1–3.5 B1 Dn D1–6.8 [इ]मां (for [इ]मा). K1–3.5 B1 Dn1 D2–4.6.8 गाथां गीतां ययातिना (K1 °नां) (for the post. half). —(L. 26) Da यानि (for याभिः). Ś1 K1.4 D1 प्रत्याहरत्. K3.5 D4 योभिप्रेत्याहरेत्कामान् (for the prior half). B5 कूर्मवत् (for सर्वशः). Bo सर्वांगानीव कूर्मवत्; Da सर्वशोंगानि कूर्मवत् (for the post. half). — With lines 27–30, cf. B. 12. 326. 33–34. —(L. 27) K2 Da1 बिभ्येति (for बिभेति). D1 न बिभेति यदा यं च (for the prior half). —(L. 28) Da नेच्छसि; D1 नैच्छति (for नेच्छति). —(L. 29) V1 B2 Da D3.5 भावं न (by transp.); D8 भावं नु. Ś1 K1.4 D1.4 transp. भावं and कुरुते. B2 D8 पावकं (for पापकम्). —(L. 31) K1.3.5 Dn D1.4.6 -मोहश्च (for °स्य). K2 विनीतमोहमानस्य; B2 मानमोहविनीता स्युर्; Da मानमोहविनीतस्य (for the prior half). K V1 Da Dn D1.2.4.6.8 -विवर्जितः (for °नः). —(L. 32) K4 V1 B Da D2.3.5.6 तथात्म- (for तदात्म-). K V1 B Da Dn D2.3.5.6.8 साधो (for साधोर्). —(L. 33) B2 Da च (for तु). K3 श्रृणुमः (for श्रृणु मे). K3 D4 संयतेंद्रियान्. — D8 om. lines 34–35. —(L. 34) V1 Bo.2–5 D1 तु मन्यंते (for वृत्तमन्ये). Ś1 K1.4.5 इच्छंति; Da ईहति (for ईहन्ति). —(L. 35) K4 D3.5 यद् (for य). B2 Da ईहते धनहेतोर्यस्; D1.4 धने हेतोर्य ईहेतां (for the prior half). —(L. 36) D4.6 भूयाद् (for भूयान्). D2.3.5 [ऽ]स्ति; D4 च (for हि). K5 B1.3–5 Dn D2.3.5.8 वित्तस्य; Bo संवित्तस्य (hypermetric); D6 चित्तस्य (for वित्तेषु). D4 यथाश्रया (for तदाश्रयः). —(L. 37) K5 अनुपश्याम; B2 Da °मि (for °मस्). —(L. 38) Da वर्जयीनानाम्; D6 °मानानाम्. —(L. 39) D8 चित्तम् (for वित्तम्). D2.3.5.8 अनुपश्यंते; D4 अभिपद्यंत (for °पद्यन्ते). K3.5 B1 Dn1 D4 सम्यक्त्वं तेषु दुर्लभम् (for the post. half).

— Ś1 K1.2 D1 om. lines 40–42. —(L. 40) K4 द्रुह्यते; B1 द्रुह्यतां; Dn2 द्रुह्यतत्; D2.3.6 द्रुह्यति (for °तः). K3.5 प्रति; D4 प्रेति (for प्रैति). D4 यथा तथा. —(L. 41) K3.5 यदि (for यस्तु). K3.5 [अ]संपन्न-; D6 [अ]यं भिन्न-; D8 संनिभ- (for संभिन्न-). —(L. 42) Da स्वल्पेन. Da ह्रस्वन्; Dn2 द्रुह्याद् (for द्रुह्यन्). V1 भ्रूणहत्या. —(L. 43) K3 D2–5 दुःखानि; B1 दृश्यंति; B3.5 (marg.) ईर्ष्यंति; D6 द्रुह्यंति (for दुष्यन्ति). Ś1 K1.2 V1 B4 Da अददतो; Dn D8 ददतो; D1 [आ]ददते (for [आ]ददतो). K4 दुष्यान्न ददतो भृत्यान् (for the prior half). Da1 नित्य- (for °त्यं). Ś1 K D1.4 -भयं (K3 °ये) तथा; Da -भयात्ततः (for °दिव). —(L. 44) D2 om. from दुर्लभं up to गाथां (in line 47). B1 मत्वा; D6 हत्वा (for दत्त्वा). Ś1 K1.2.4 च तप्यते; D6 न तप्यते (for [अ]नुतप्यते). —(L. 45) Ś1 K1.4 D1 केन (for कस्य). V1 -चिद् (for किं). K2 Dn1 D2 सर्वशः; K3 D4 संगतः (for सर्वतः). —(L. 46) Ś1 K1 उरगम्; D1 द्विजिह्वम्; D4 देवस्यम् (for °स्वम्). K1 V1 B4 D1.3.5 न धनेन (by transp.); D6 स धनेन; D8 अनेन न. Ś1 K (except K2) Da D1.4 सदा (for भवेत्). —(L. 47) K1 अथ; K3 B5 Dn1 D2.6 तत्र (for अत्र). Da अत्र गाथा यज्ञगीता (for the prior half). Da कथयंति. D4 पुरातन. —(L. 48) K2 V1 Bo.3.5 Da D2.3.5.6 अपा(D6 °या)श्रिते; Dn अपा(Dn2 °या)श्रितां; D1 सयाःस्थिता (sic); D4 उपाश्रिता (for °श्रितां). Ś1 K1.4 त्रयीमयाः स्थिता लोके (for the prior half). K3.5 D4 -संस्तव- (K5 °र)कारिणीं; Da -संभवकारिते; D6 -संसारकारिका. — D8 om. lines 49–52. —(L. 49) D1 दृष्टो निधनानि; D8 corrupt. —(L. 50) Ś1 K1–3 D1.4 यज्ञा(K3 D4 °था)दिष्टः (for यज्ञाय सृष्टः). B1 पूरुषो. D4 न; D6 वा (for च). Ś1 K1.2.4 D1 रक्षकं (for रक्षिता).

धनं न कामाय हितं प्रशस्तम् ।
एतस्यार्थे च कौन्तेय धनं धनवतां वर ।
धाता ददाति मर्त्येभ्यो यज्ञार्थमिति विद्धि तत् ।
तस्माद्बुध्यन्ति पुरुषा न हि तत्कस्यचिद्ध्रुवम् । [55]
श्रद्दधानस्ततो लोके दद्याच्चैव यजेत च ।
लब्धस्य त्यागमेवाहुर्न भोगं न च संक्षयम् ।
तस्य किं संचयेनार्थः कार्ये ज्यायसि तिष्ठति ।
ये स्वधर्मादपेतेभ्यः प्रयच्छन्त्यल्पबुद्धयः ।
शतं वर्षाणि ते प्रेत्य पुरीषं भुञ्जते जनाः । [60]
अनर्हते यद्ददाति न ददाति यदर्हते ।
अर्हानर्हापरिज्ञानाद्दानधर्मोऽपि दुष्करः ।
लब्धानां द्रव्यजातानां बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ।

5

After 12. 40. 22, T2 ins. :

श्रीमहाभारताख्यानं वाञ्छितार्थफलप्रदम् ।
आयुष्यं पुष्टिजननं पुत्रपौत्राभिवृद्धिदम् ।
सर्वसौभाग्यदं पुंसां सर्वाघौघनिवारणम् ।
श्रीमतो वासुदेवस्य नित्यभक्त्येकसाधकम् ।
शिवस्य वासुदेवस्य देवदेवस्य चोभयोः । [5]
माहात्म्येन विशुद्धेन सर्वतः समलंकृतम् ।
राजर्षीणां पुण्यकृतां मुनीनां च महात्मनाम् ।
माहात्म्यं च महापुण्यं युद्धानां चैव कौशलम् ।
क्षेत्राणां चैव तीर्थानां नदीनां च प्रकीर्तनम् ।
महाभारतमाख्यानमितिहासं महाफलम् । [10]
आरभ्य शंतनोर्जन्म पाण्डवानां महात्मनाम् ।
राज्याभिषेकपर्यन्तं प्रयतः सुसमाहितः ।
शृणुयादर्थसिद्ध्यर्थं सर्वान्कामानवाप्नुयात् ।
अभिषेचनिकाध्यायं श्रुत्वा नित्यं समाहितः ।
पयसा सर्पिषा चैव भक्ष्यभोज्यान्नसंचयैः । [15]
भोजयेद्ब्राह्मणान्मुख्याञ्श्रेयसः साधनं हि तत् ।
महाभारतवक्तारं व्यासबुद्ध्या प्रपूजयेत् ।
वस्त्रालंकारगन्धाद्यैरुपचारैः समाहितः ।

6

D7 ins. after 76* following 12. 47. 30 : T1 G1. 2 (which ins. 76*-77*) after 77* : T2 after 12. 47. 54 :

अव्यक्तं बुद्ध्यहंकारो मनो बुद्धीन्द्रियाणि च ।
तन्मात्राणि विशेषाश्च तस्मै तत्त्वात्मने नमः ।
भूतं भव्यं भविष्यच्च भूतादिप्रभवाप्ययः ।
योऽग्रजः सर्वभूतानां तस्मै भूतात्मने नमः ।
यस्य यज्ञे वराहस्य विष्णोरमिततेजसः । [5]
प्रणामं ये प्रकुर्वन्ति तेषामपि नमो नमः ।
यं हि सूक्ष्मं विचिन्वन्ति परं सूक्ष्मविदो जनाः ।
सूक्ष्मासूक्ष्मं च यद्ब्रह्म तस्मै सूक्ष्मात्मने नमः ।

—(L. 52) Dn2 धनाय (for धनं न). D4 वामाय (for का°). Ś1 K1. 2. 4. 5 Dn2 D1. 4 हि तत्; D6 धनं (for हितं). Da1 प्रशस्ते. —(L. 53) K3 D4 एतदर्थं; K5 Dn D5 एतत्स्वार्थे (for एतस्यार्थे). K2. 4 हि (for च). Ś1 K1. 4 D1 वरं; Da1 वरः (for वर). —(L. 54) Ś1 K1. 2. 4 D1 दाता (for धाता). B3 m. 4 दधाति (for ददाति). K1 मंत्रेभ्यो. — K3 om. lines 55-56. —(L. 55) Ś1 K1. 4 D1 वृध्यंति; D4 रुध्यंति (for बु°). Ś1 K1. 4 Da D1. 4 च (for हि). —(L. 56) K2 B1-5 D3. 5. 6. 8 लोको (for °के). V1 न जायते; D6. 8 यजेति च (for यजेत च). —(L. 57) K5 D2-5. 8 इत्याहुर् (for एवा°). K2 B4 Dn1 संचयं (for संक्षयम्). K3 D4 न च भोगं न संचयं (for the post. half). —(L. 58) B2 Da तत्र; Dn2 यस्य (for तस्य). Ś1 K Bo. 3 m. 5 D1. 4 कः; Da यः (for किं). B3 (marg.) [अ]थ (for [अ]र्थः). D2 om. from कार्ये up to यद्ददाति (in line 61). D6 तिष्ठसि. —(L. 59) K5 च; D1 स- (for स्व-). D4 अपेतास्यः (for °तेभ्यः). B2 अपात्रेभ्यः स्वधर्मेभ्यः (for the prior half). —(L. 60) Da तत्प्रेत्य (for ते प्रेत्य). B1 Da नराः (for जनाः). —(L. 62) Bo हि (for ऽपि). —(L. 63) K2. 4 B5 लु (K2 ल)-ब्धानां द्रव्यम (K2 °स)त्तानां; K3. 5 Dn D4. 5 लब्धानामपि वित्तानां; V1 लब्धानां हि द्रव्यत्रतां (for the prior half). K2. 4 द्वावपि क्रमात्. —(L. 64) D2 अपात्र- (for °त्रे). B2 गात्रे (for पात्रे). Bo प्रतिपादनं; B2 [अ]प्रतिपालनं.

5

[App. No. 5, printed here for convenience, is the same as 59*.]

6

D7 T2 read lines 1-6 after line 42, followed by 77* (cf. v. l. 30). —(L. 1) D7 अव्यक्त- (for अव्यक्तं). T2 बुद्ध्यहंकारौ. —(L. 3) G2 भविष्यं (for °ष्यच्). D7 T2 भूतानां (for °दि-). T2 -प्रभवाव्ययः (for °प्ययः). — Lines 5-6 = 96*. T1 G1. 2 om. lines 5-6. D7 T2 read lines 7-8 after

मत्स्यो भूत्वा विरिञ्चाय येन वेदाः समाहृताः ।
रसातलगताः शीघ्रं तस्मै मत्स्यात्मने नमः । [10]
मन्दराद्रिर्धृतो येन प्राप्ते ह्यमृतमन्थने ।
अतिकर्कशदेहाय तस्मै कूर्मात्मने नमः ।
वाराहं रूपमास्थाय महीं सवनपर्वताम् ।
उद्धरत्येकदंष्ट्रेण तस्मै क्रोडात्मने नमः ।
नारसिंहवपुः कृत्वा सर्वलोकभयंकरम् । [15]
हिरण्यकशिपुं जघ्ने तस्मै सिंहात्मने नमः ।
पिङ्गेक्षणसटं यस्य रूपं दंष्ट्रनखैर्युतम् ।
दानवेन्द्रान्तकरणं तस्मै दृप्तात्मने नमः ।
वामनं रूपमास्थाय बलिं संयम्य मायया ।
त्रैलोक्यं क्रान्तवान्यस्तु तस्मै क्रान्तात्मने नमः । [20]
जमदग्निसुतो भूत्वा रामः शस्त्रभृतां वरः ।
महीं निःक्षत्रियां चक्रे तस्मै रामात्मने नमः ।
त्रिःसप्तकृत्वो यश्चैको धर्मव्युत्क्रान्तिगौरवात् ।
जघान क्षत्रियान्संघे तस्मै क्रोधात्मने नमः ।
रामो दाशरथिर्भूत्वा पुलस्त्यकुलनन्दनम् । [25]
जघान रावणं संख्ये तस्मै क्षत्रात्मने नमः ।
यो हली मुसली श्रीमान्नीलाम्बरधरः स्थितः ।
रामाय रौहिणेयाय तस्मै भोगात्मने नमः ।
शङ्खिने चक्रिणे नित्यं शार्ङ्गिणे पीतवाससे ।
वनमालाधरायैव तस्मै कृष्णात्मने नमः । [30]
वसुदेवसुतः श्रीमान्क्रीडितो नन्दगोकुले ।
कंसस्य निधनार्थाय तस्मै क्रीडात्मने नमः ।
वसुदेवत्वमागम्य यदोर्वंशसमुद्भवः ।
भूभारहरणं चक्रे तस्मै कृष्णात्मने नमः ।
सारथ्यमर्जुनस्याजौ कुर्वन्गीतामृतं ददौ । [35]
लोकत्रयोपकाराय तस्मै ब्रह्मात्मने नमः ।
दानवांस्तु वशे कृत्वा पुनर्बुद्धत्वमागतः ।
सर्गस्य रक्षणार्थाय तस्मै शुद्धात्मने नमः ।
हनिष्यति कलौ प्राप्ते म्लेच्छांस्तुरगवाहनः ।
धर्मसंस्थापको यस्तु तस्मै कल्क्यात्मने नमः । [40]
क्षत्रियाणां सहस्राणि प्रयुतान्यर्बुदानि च ।
योऽवधीद्भारते युद्धे तस्मै क्रीडात्मने नमः ।
तारान्वये कालनेमिं हत्वा दानवपुंगवम् ।
ददौ राज्यं महेन्द्राय तस्मै मुख्यात्मने नमः ।
यः सर्वप्राणिनां देहे साक्षीभूतो व्यवस्थितः । [45]
अक्षरक्षरमाणानां तस्मै साक्ष्यात्मने नमः ।
नमोऽस्तु ते महादेव नमस्ते भक्तवत्सल ।
सुब्रह्मण्य नमस्तेऽस्तु प्रसीद परमेश्वर ।
अव्यक्तव्यक्तरूपेण व्याप्तं सर्वं त्वया विभो ।
नारायणं सहस्राक्षं सर्वलोकमहेश्वरम् । [50]
हिरण्यनाभं यज्ञाङ्गममृतं विश्वतोमुखम् ।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो देवेशो मङ्गलायतनं हरिः ।
मङ्गलं भगवान्विष्णुर्मङ्गलं मधुसूदनः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुडध्वजः । [55]

7

After 12. 47. 47, $D_{2.6}$ ins. :

सुतले तलमध्यस्थो हत्वा तु मधुकैटभौ ।

84*. —(L. 7) T_2 लक्ष्यविदो. —(L. 9) T_2 देवाः (for वेदाः). —(L. 10) T_2 शीघ्रास्. D_7 T_2 (also as above) मोह्यात्मने (for मत्स्या°). —(L. 11) T_2 मंदरस्तु (for °राद्रिर्). D_7 प्राप्तो. G_1 -मंथरे (for °ने). —(L. 13) D_7 T_1 G_1 वराह- (G_1 °हं); G_2 वरांगं (for वाराहं). —(L. 14) D_7 T_2 उद्धार. D_7 कालात्मने (for क्रोडा°). —(L. 15) D_7 T_2 -क्षयंकरं (for -भयं°). — Lines 17–18 = lines 3–4 of 80*. —(L. 17) D_7 सिंहेक्षण- (for पिङ्गे°). G_2 -सदं (for -सटं). T_2 G_2 दंष्ट्रा-; G_1 दृष्ट्वा (for दंष्ट्र-). —(L. 18) T_1 (*sup. lin.* also as above) -हरणं (for -क°). — G_2 om. (hapl.) lines 21–22. —(L. 22) D_7 T_2 क्रोधात्मने (for रामा°). — Lines 23–24 = lines 7–8 of 79*. D_7 T_2 om. lines 23–24. (L. 23) T_1 -गौरवान् (for °वात्). —(L. 24) T_1 संख्ये (for संघे). —(L. 25) T_2 पौलस्त्य-. —(L. 26) T_1 G_1 संघे; G_2 संखे (for संख्ये). —(L. 27) D_7 भूत्वा (for श्रीमान्). D_7 T_2 प्रभुः (for स्थितः). — D_7 T_2 om. (hapl.) lines 31–36. G_2 om. (hapl.) lines 33–34. —(L. 33) T_1 वासुदेवत्वम् (for वसु°). —(L. 35) T_1 [आ]दौ (for [आ]जौ). —(L. 36) G_2 कृष्णात्मने (for ब्रह्मा°). — D_7 reads lines 37–38, followed by 76*, after 12. 47. 53; T_2 after 88* (for both, cf. pp. 194–195. —(L. 38) T_1 बुद्धात्मने ; G_2 अध्या° (for शुद्धा°). — D_7 T_2 read lines 39–42, followed by 77*, and lines 1–6 after line 44. —(L. 39) D_7 T_2 वधिष्यति (for हनि°). — T_1 $G_{1.2}$ om. (hapl.) lines 41–42. —(L. 43) D_7 T_2 तारामये. —(L. 44) D_7 T_2 transp. ददौ and राज्यं. T_1 G_2 सां(G_2 सं)ख्यात्मने ; T_2 ख्याता° (for मुख्या°). — D_7 T G_2 om. (hapl.) lines 45–46. D_7 reads lines 47–55 after 12. 47. 54. Lines 50–51 = 94*. D_7 repeats and T_2 reads lines 50–51 (followed by 96* in T_2) after 92* (cf. v. l. 12. 47. 60). T_2 om. lines 52–55. —(L. 53) D_7 भगवान् (for देवेशो).

उद्धृता येन वै वेदास्तस्मै मत्स्यात्मने नमः ।
ससागरनगां बिभ्रत्सप्तद्वीपां वसुंधराम् ।
यो धारयति पृष्ठेन तस्मै कूर्मात्मने नमः ।
एकार्णवे महीं मग्नां वाराहं रूपमास्थितः । [5]
उद्धार महीं योऽसौ तस्मै क्रोडात्मने नमः ।
नारसिंहं ततः कृत्वा यस्त्रैलोक्यभयंकरम् ।
हिरण्यकशिपुं जघ्ने तस्मै सिंहात्मने नमः ।
वामनं रूपमास्थाय बलिं संयम्य मायया ।
इमे क्रान्तास्त्रयो लोकास्तस्मै क्रान्तात्मने नमः । [10]
जमदग्निसुतो भूत्वा रामः परशुधृक्प्रभुः ।
सहस्रार्जुनहन्ता यस्तस्मा उग्रात्मने नमः ।
रामो दाशरथिर्भूत्वा पौलस्त्यकुलनन्दनम् ।
जघान रावणं संख्ये तस्मै क्षत्रात्मने नमः ।
वसुदेवसुतः श्रीमान्वासुदेवो जगत्पतिः । [15]
जहार वसुधाभारं तस्मै कृष्णात्मने नमः ।
बुद्धरूपं समास्थाय सर्वधर्मपरायणः ।
मोहयन्सर्वभूतानि तस्मै मोहात्मने नमः ।
हनिष्यति कलेरन्ते म्लेच्छांस्तुरगवाहनः ।
धर्मसंस्थापनार्थाय तस्मै कालात्मने नमः । [20]
अनादिरादिर्विश्वस्य तस्मै विश्वात्मने नमः ।

8

After 12. 74. 2^{ab}, D_7 S ins.:

तेषामर्थश्च कामश्च धर्मश्चेति विनिश्चयः ।
श्लोकांश्चोशनसा गीतांस्तान्निबोध युधिष्ठिर ।
उच्छिष्टः स भवेद्राजा यस्य नास्ति पुरोहितः ।
रक्षसामसुराणां च पिशाचोरगपक्षिणाम् ।
शत्रूणां च भवेद्वध्यो यस्य नास्ति पुरोहितः । [5]
ब्रह्मत्वं सर्वयज्ञेषु कुर्वीताथर्वणो द्विजः ।
राज्ञश्चाथर्ववेदेन सर्वकर्माणि कारयेत् ।
ब्रूयाद्गर्ह्याणि सततं महोत्पातान्यघानि च ।
इष्टमङ्गलयुक्तानि तथान्तःपुरकाणि च ।
गीतनृत्ताधिकारेषु संमतेषु महीपतेः । [10]
कर्तव्यं करणीयानि वैश्वदेवबली तथा ।
पक्षसंधिषु कुर्वीत महाशान्तिं पुरोहितः ।
रौद्रहोमसहस्रं च स्वस्य राज्ञः प्रियं हितम् ।
राज्ञः पापमलाः सप्त यानृच्छति पुरोहितः ।
अमात्याश्च कुकर्माणो मन्त्रिगश्चाप्युपेक्षकाः । [15]
चौर्यमव्यवहारं च व्यवहारोपसेविनाम् ।
अदण्ड्यदण्डनं चैव दण्ड्यानां चाप्यदण्डनम् ।
हिंसा चान्यत्र संग्रामाद्यज्ञाच्च मल उच्यते ।
कुभृत्यैस्तु प्रजानाशः सप्तमस्तु महामलः ।
रौद्रैर्होमैर्महाशान्त्या घृतकम्बलकर्मणा । [20]
भृग्वङ्गिरो विधिज्ञो वै पुरोधा निर्णुदेन्मलान् ।
एतान्हित्वा दिवं याति राजा सप्त महामलान् ।
सामात्यः सपुरोधाश्च प्रजानां पालने रतः ।
एतस्मिन्नेव कौरव्य पौरोहित्ये महामते ।
श्लोकानाह सुरेन्द्रस्य गुरुर्देवो बृहस्पतिः । [25]

7

(L. 7) D_6 वपुः (for ततः). — (L. 11) D_3 -सूतो (for -सुतो). — (L. 15) D_6 वासुदेव- (for वसु°). — Line 21 = 12. 47. 47^{cd}.

8

$M_{1.3.4}$ om line 1. — (L. 1) T_2 G_1 M_2 transp. कामश्च and धर्मश्च. M_2 [ए]व (for [इ]ति). M_2 सुनिश्चितः (for विनिश्चयः). — (L. 2) M_1 गीतास्. — (L. 4) M_2 -रक्षसां (for -पक्षिणाम्). — (L. 6) G_4 सर्वमंत्रेषु (for °यज्ञेषु). D_7 सर्वयज्ञेषु ब्रह्मत्वं (for the prior half). — (L. 7) T_2 $M_{1.3.4}$ राज्ञां (for राज्ञश्). $G_{1.2}$ [अ]थर्ववेदेषु (for °वेदेन). — (L. 8) T_2 G_1 M भूयो (for ब्रूयाद्). T_2 G_1 M_2 ग्राह्याणि ; G_2 कार्याणि (for गर्ह्याणि). M_{1-3} महोत्पातानघानि च ; M_4 °ह्यानि च (for the post. half). — (L. 9) D_7 T G_{2-4} इष्टमंगळ- (for °मङ्गल-). D_7 T_1 $G_{3.4}$ [अं]तःपुरिकाणि (for °पुरकाणि). — (L. 10) T_2 G_1 $M_{3.4}$ महीपते (for °पतेः). — (L. 11) T_2 G_1 कर्तव्य- (for कर्तव्यं). T_2 G_1 -करणीयादि ; M_3 करणीयं च (for °यानि). T_2 $G_{1.2}$ M_2 -बलिस् ; $M_{1.3.4}$ -बलिं (for -बली). M_2 यथा (for तथा). — (L. 13) G_1 राष्ट्र- ; $M_{1.3.4}$ रौद्रं (for रौद्र-). M_4 तु (for च). M_2 राज्ञा (for राज्ञः). M प्रजाहितं (M_2 °तः) (for प्रियं हितम्). — (L. 14) G_3 यानि (for यान्). $G_{1.2}$ M_2 ऋच्छंति ; G_3 [इ]च्छति (for ऋच्छति). — (L. 15) M_4 विकर्माणो (for कु°). — (L. 16) T_2 G_2 शौर्यम् (for चौर्यम्). D_7 T_1 G_{2-4} अव्यवहारश्च (for °रं च). $M_{1.3}$ व्यवहाराप- (for °रोप-). T_2 M -सेवनं ; G_1 -सेवने (for -सेविनाम्). — (L. 17) G_1 अदंड्यान्दंडयंश्चैव. — (L. 19) M च (for तु). M_4 सप्तमं (for °मस्). D_7 T G महाबलः (for °मलः). — (L. 20) T_2 कृतकंबल- ; M_4 घृतकंबळ-. — (L. 21) G_1 निर्णिते ; G_2 M_4 निर्नुदेन् ; M_2 निमदेन् (for निर्णुदेन्). — (L. 22) M_4 यांति. S (except T_1 G_4 M_1) महाबलान् (for °मलान्). — (L. 25) D_7 T_1 G_{2-4} महेंद्रस्य (for सुरेन्द्रस्य). — (L. 26) D_7 महीपाल

तान्निबोध महाभाग महीपालहितान्शुभान् ।
ऋग्वेदे सामवेदे च यजुर्वेदे च वाजिनाम् ।
न निर्दिष्टानि कर्माणि त्रिषु स्थानेषु भूभृताम् ।
शान्तिकं पौष्टिकं चैव अनिष्टानां च शातनम् ।
शशास्ते याज्ञवल्क्येन यज्ञानां हितमीहता । [30]
ब्रह्मिष्ठानां वरिष्ठेन ब्रह्मणः संमते विभोः ।
बह्वृचं सामगं चैव वाजिनं च विवर्जयेत् ।
बह्वृचो राष्ट्रनाशाय राजनाशाय सामगः ।
अध्वर्युर्बलनाशाय प्रोक्तो वाजसनेयकः ।
अब्राह्मणेषु वर्णेषु मंत्रान्वाजसनेयकान् । [35]
शान्तिके पौष्टिके चैव नित्यं कर्मणि वर्जयेत् ।
ब्राह्मणस्य महीपस्य सर्वथा न विरोधिनः ।
वेदाश्चत्वार इत्येते ब्राह्मणा ये च तद्विदुः ।
पौरोहित्ये प्रमाणं तु ब्राह्मणश्च महीपते ।
जात्या न क्षत्रियः प्रोक्तः क्षतत्राणं करोति यः । [40]
चातुर्वर्ण्यबहिष्ठोऽपि स एव क्षत्रियः स्मृतः ।
भार्गवाङ्गिरसैर्मन्त्रैस्तेषां कर्म विधीयते ।
वैतानं कर्म यच्चैव गृह्यकर्म च यत्स्मृतम् ।
द्विजातीनां त्रयाणां तु सर्वकर्म विधीयते ।
राजधर्मप्रवृत्तानां हितार्थं त्रीणि कारयेत् । [45]
शान्तिकं पौष्टिकं चैव तथाभिचरणं च यत् ।
अग्निष्टोमसुखैर्यज्ञैर्दूषिता भूपकर्मभिः ।
न सम्यक्फलमिच्छन्ति ये यजन्ति द्विजातयः ।
पौरोहित्यं हि कुर्वाणा नाशं यास्यन्ति भूभृताम् ।
यज्ञकर्माणि कुर्वाणा ऋत्विजस्तु विरोधिनः । [50]
ब्रह्मक्षत्रविशः सर्वे पौरोहित्ये विवर्जिताः ।
तदभावे च पारक्यं निर्दिष्टं राजकर्मसु ।
ऋषिणा याज्ञवल्क्येन तत्तथा न तदन्यथा ।
भार्गवाङ्गिरसां वेदे कृतविद्यः षडङ्गवित् ।
यज्ञकर्मविधिज्ञश्च विधिज्ञः पौष्टिकेषु च । [55]
अष्टादशविकल्पानां विधिज्ञः शान्तिकर्मणाम् ।
सर्वरोगविहीनश्च संयतः संयतेन्द्रियः ।
श्वित्रकुष्ठक्षयक्षीणैर्ग्रहापस्मारदूषितैः ।
अशस्तैर्वातदुष्टैश्च दूरस्थैः संवदेन्नृपः ।
रोगिणं त्वृत्विजं चैव वर्जयेच्च पुरोहितम् । [60]
न चान्यस्य कृतं येन पौरोहित्यं कदाचन ।
यस्य याज्यो मृतश्चैव भ्रष्टः प्रव्रजितोऽथ वा ।
युद्धे पराजितश्चैव सर्वांस्तान्वर्जयेन्नृपः ।
नक्षत्रस्यानुकूल्येन यः संजातो नरेश्वरः ।
राजशास्त्रविनीतश्च श्रेयान्प्राज्ञः पुरोहितः । [65]
अधन्यानां निमित्तानामुत्पातानामथार्थवित् ।
शत्रुपक्षक्षयज्ञश्च श्रेयान्प्राज्ञः पुरोहितः ।
वाजिनं तदभावे च चरकाध्वर्यवानथ ।
बह्वृचं सामगं चैव नीतिशास्त्रकृतश्रमान् ।

(for महाभाग). D_7 महाभागहितान्; G_1 महीपालयितान्; M_4 °युतान्. — (L. 27) T_2 G_1 $M_{1,2}$ ऋग्वेद- (for °वेदे). — (L. 29) T_2 G_1 M_{1-3} नाशनं; M_4 शासनं (for शातनम्). — (L. 30) D_7 सप्त; G_1 तप्तास् (for शशास्). G_2 च (for ते). D_7 M य(D_7 या)ज्ञवल्के(M_2 °ल्क्ये)न. T_2 G_1 प्रजानां (for यज्ञानां). T_2 G_2 $M_{2,4}$ इच्छता (for ईहता). — (L. 31) T_2 ब्रह्मणा. M_4 संमतो (for °ते). $G_{1,2}$ M विभो (for विभोः). — (L. 32) $M_{1,3}$ सामनं (for °गं). — G_3 om. (hapl.) lines 33–36. — (L. 33) M_4 राज्य- (for राष्ट्र-). M_4 राजा (for राज-). — (L. 34) T_2 G_1 प्रोक्ता वाजसनेयकाः (for the post. half). — (L. 35) T_2 मंत्रेषु (for वर्णेषु). D_7 T_1 $G_{2,4}$ वाजसनेयिकान्; M_4 °यगान्. — (L. 36) $G_{1,2}$. पुष्टिके (for पौष्टिके). T_2 G_1 कर्माणि (for कर्मणि). — (L. 37) M_4 सर्वस्थान- (for सर्वथा न). — (L. 38) M तद्विदः (for °दुः). — (L. 39) T_2 $G_{1,2}$ M_2 ब्राह्मणाश्च; $M_{1,3,4}$ ब्राह्मणस्य. D_7 $M_{1,3,4}$ महीपतेः (for °पस्य). — (L. 40) G_1 M_{1-3} हि; M_4 नि- (*inf. lin.* ह) (for न). — (L. 41) T_2 M चा($M_{1,3}$ च)तुर्वर्ण-. M चेह (for एव). — (L. 43) M वर्ज(M_2 °र्त)येच् (for कर्म यच्). M गर्ह्य (for गृह्य-). — (L. 45) T_2 राजकर्म-; M °शब्द (for °धर्म-). M त्रीणि कर्माणि कारयेत् (for the post. half). — (L. 47) G_3 पापकर्मभिः (for भूप°). — (L. 48) T_2 बलम् (for फलम्). $M_{3,4}$ ऋच्छंति (for इच्छन्ति). — (L. 49) G_2 तु (for हि). — (L. 50) D_7 G_1 यज्ञकर्मणि. T_2 G_2 M [अ]विरोधिनः (for विरो°). — (L. 51) T_2 M ब्रह्मक्षत्रविशां. G_1 M पौरोहित्य-. — (L. 52) $G_{1,2}$ M_2 पारक्यौ; M_3 चारक्यं. — (L. 53) M यज्ञवल्के(M_2 °ल्क्ये)न. — (L. 54) M भार्गवांगिरसे. T_2 तथा विद्वान् (for कृतविद्यः). — (L. 56) M_2 त्रिधिज्ञाः. — (L. 57) T_2 G_1 सर्वतः; $M_{1,3}$ संयुतः (for संयतः). G_2 त्वं यतेंद्रियः. — (L. 58) G_1 M_2 चित्र-; G_4 श्वित्री-; M_1 श्वित्रि-; $M_{3,4}$ श्रित्र- (for श्वित्र-). G_4 -कुष्ठी- (for -कुष्ठ-). — (L. 59) T_2 दूरस्थः. $G_{1,2}$ नृप. — (L. 60) M_2 रोगिणाम् (for °णं). T_2 G_1 M_2 om. तु. M_2 [ऋ]त्विजां (for °जं). — G_2 om. (hapl.) from post. half of line 60 up to the prior half of line 63. — (L. 62) $M_{2,4}$ यज्ञो (for याज्यो). D_7 T_2 G_1 यथा (for ऽथ वा). — (L. 64) T_2 G_1 यस्तु जातो; M यस्मिञ्जातो. — (L. 66) T_2 अधान्यानां; G_1

कृतिनोऽथर्वणे वेदे स्थापयेत्तु पुरोहितान् । [70]
हिंसालिङ्गा हि निर्दिष्टा मन्त्रा वैतानिकैर्द्विजैः ।
न तानुच्चारयेत्प्राज्ञः क्षात्रधर्मविरोधिनः ।
प्रजागुणः पुरोधाश्च पुरोहितगुणाः प्रजाः ।

9

After 12. 77. 5, D_7 S ins.:

म्लेच्छदेशास्तु ये केचित्पापैरध्युषिता नरैः ।
गत्वा तु ब्राह्मणस्तांश्च चण्डालः प्रेत्य चेह च ।
व्रात्यान्म्लेच्छांश्च शूद्रांश्च याजयित्वा द्विजाधमः ।
अकीर्तिमिह संप्राप्य नरकं प्रतिपद्यते ।
महावृन्दसमुद्राभ्यां पर्यायेणैकविंशतिम् । [5]
ब्राह्मणो ऋग्यजुःसाम्नां मूढः कृत्वा तु विप्लवम् ।
कल्पमेकं क्रमिः सोऽथ नानाविष्ठासु जायते ।
व्रात्ये म्लेच्छे तथा शूद्रे तस्करे पतितेऽशुचौ ।
कुदेशे च सुरापे च ब्रह्मघ्ने वृषलीपतौ ।
अनधीतिषु सर्वत्र भुञ्जाने यत्र तत्र वा । [10]
बालस्त्रीवृद्धहन्तुश्च मातापित्रोर्गुरोस्तथा ।
मित्रध्रुहि कृतघ्ने च गोघ्ने चैव कथंचन ।
पुत्रघातिनि शत्रौ च न मन्त्रान्योजयेद्द्विजः ।
स तेषां विप्लवः प्रोक्तो मन्त्रविद्भिः सनातनैः ।
यदि विप्रो विदेशस्थस्तीर्थयात्रां गतोऽथ वा । [15]
यदि भीतः प्रपन्नो वा कुदेशं शौचवर्जितम् ।
सुसंयतः शुचिर्भूत्वा मन्त्रानुच्चारयेद्द्विजः ।
आर्तश्चोच्चारयेन्मन्त्रमार्तत्राणपरोऽथ वा ।
हीनेष्वपि प्रयुञ्जानो नासौ विप्लावकः स्मृतः ।
क्रूरकर्मा सुकर्मा वा कर्मभिर्वञ्चितोऽथ वा । [20]
तत्त्ववित्तरते पापं शीलवान्संयतेन्द्रियः ।

10

After 12. 95. 4, D_7 S ins.:

दण्डो हि बलवान्यत्र तत्र साम प्रयुज्यते ।
प्रदानं सामपूर्वं च भेदमूलं प्रशस्यते ।
त्रयाणां विफलं कर्म यदा पश्येत भूमिपः ।
रन्ध्रं ज्ञात्वा ततो दण्डं प्रयुञ्जीताविचारयन् ।
अभिभूतो यदा शत्रुः शत्रुभिर्बलवत्तरैः । [5
उपेक्षा तत्र कर्तव्या वध्यतां बलिनां बलम् ।
दुर्बलो हि महीपालो यदा भवति भारत ।
उपेक्षा तत्र कर्तव्या चतुर्णामविरोधिनी ।
उपायः पञ्चमः सोऽपि सर्वेषां बलवत्तरः ।

अथाम्यानां. —(L. 67) T_2 $G_{1.2}$ राज- (for राज्ञः). —(L. 68) M_2 वाजिना. T_2 G_1 चकारध्वर्यवान्; M_3 राज्ञोक्ता°; M_4 चरकाध्वर्यु°. —(L. 69) G_3 नीतिश्रीशास्त्रकृत- (hypermetric). $M_{1.3.4}$ -श्रमं (for -श्रमान्). —(L. 70) M_{1-3} कृती(M_2 °ति)नाथर्वणे. T_2 G_1 M स्थापयेत. —(L. 71) T_2 $G_{1.2}$ M_2 हिंसालिंगादि- (for °लिङ्गा हि). M वैतानिका. —G_3 om. lines 72–73. —(L. 72) G_1 अचरयेत्; $M_{1.3}$ उच्चरयेत्. $M_{1.3}$ -धर्मा-विरोधिनः. —(L. 73) D_7 G_4 प्रजागुणाः.

9

(L. 1) M_2 केचित्तु (for ये केचित्). —(L. 2) $M_{1.3}$ ब्राह्मणांस्(for °णस्). T_2 G_1 तु (for च). M_4 चंडालाः. T_2 चैव हि (for चेह च). —(L. 3) G_1 व्रत्यान् (for व्रात्यान्). G_1 द्विजाधमं (for °धमः). —(L. 5) T_2 M महादुःखसमुद्राख्यं (for the prior half). —(L. 6) G_2 त्वृग्यजुः-; $M_{1.3}$ ह्यृग्यजुः-; M_4 [ऽ]थर्वयजुः-. —(L. 7) T_2 G_1 एवं (for एकं). T_2 $G_{1.2}$ M_2 क्रमिस्थोथ (for क्रमिः सोऽथ). —(L. 8) D_7 वृत्त्या (for व्रात्ये). M_2 शूद्रो (for म्लेच्छे). $M_{1.3.4}$ व्रात्ये शूद्रे तथा म्लेच्छे (for the prior half). —(L. 9) $G_{1.2}$ वृषलीपतौ. —(L. 10) G_1 अन्नधीतेषु; M °ध्यायेषु (for °धीतिषु). D_7 $G_{1.2}$ M_2 भुंजानो (for °ने). G_2 यत्र (for तत्र). —(L. 11) G_1 तथैव च (also as above) (for गुरोस्तथा). —(L. 12) M न च गोघ्ने (for गोघ्ने चैव). —(L. 13) D_7 $G_{3.4}$ न मंत्राद्यानयेद्द्विजः (for the post. half). —After line 13, T_2 G_1 read lines 18–19. —(L. 14) T_2 G_1 M_2 मंत्रकृद्भिः; $M_{1.3.4}$ °दृग्भिः. —(L. 15) G_2 M_{1-3} तीर्थयात्रा-. G_1 M_2 यथा; G_4 [ऽ]पि वा (for ऽथ वा). —(L. 16) G_4 प्रमत्तो (for प्रपन्नो). T_2 G_1 अप्रमत्तः प्रमत्तो वा कुदेशः शौच-वर्जितः. —(L. 17) T_1 सुसंयुक्तः. T_1 ततः (for द्विजः). —T_2 G_1 read lines 18–19 after line 13. —(L. 18) M_2 -परीप्सया (for -परोऽथ वा). —(L. 19) G_2 विप्लवकः. —(L. 20) D_7 T_1 G_{2-4} विकर्मा; M_2 [अ]ल्पकर्मा (for (for सु°). G_1 सा (for वा). G_2 व्यंजितो; $M_{1.3.4}$ वर्जितो (for वञ्चितो). —(L. 21) $M_{1.3}$ तरतो (for तरते).

10

(L. 1) G_2 [ऽ]ति-; $M_{1.3.4}$ [ऽ]पि (for हि). $M_{1.3.4}$ वहुलो (for बलवान्). —(L. 2) G_2 M दंडमूलं (for भेद°). —(L. 3) M_{1-3} यत्र; M_4 तत्र (for यदा). T_2 पश्यति (for पश्येत). —(L. 4) $M_{1.3}$ [अ]विचारय (for °यन्). —(L 5) M_4 om. यदा. —G_1 M om. (hapl.) lines 6–7. —(L. 9) M_2 उपायं. —(L.

भार्गवेण च गीतानां श्लोकानां कौसलाधिप । [10]
विज्ञाय तत्त्वं तत्त्वज्ञ तत्त्वतस्तत्करिष्यसि ।
यदि रक्षः पिशाचेन हन्यते यत्र कुत्रचित् ।
उपेक्षा तत्र कर्तव्या वध्यतां बलिनां बलिः ।
दुर्बलो हि महीपालः शत्रूणां शत्रुमुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनैव कण्टकम् । [15]
शठानां सचिवानां च म्लेच्छानां च महीपते ।
एष उक्त उपायानामुपेक्षा बलवत्तमा ।
अश्मना नाशयेल्लोहं लोहेनाश्मानमेव च ।
बिल्वानीवापरैर्बिल्वैर्म्लेच्छान्म्लेच्छैः प्रसादयेत् ।
दासानां च प्रदृप्तानामेतदेवेह कारयेत् । [20]
चण्डालम्लेच्छजातीनां दण्डेन च निवारणम् ।
शठानां दुर्विनीतैश्च पूर्वमुक्तं समाचरेत् ।
अन्याः शठाश्च सचिवास्तथा कुब्राह्मणादयः ।
उपायैः पञ्चभिः साध्याश्चतुर्वर्गविरोधिनः ।

11

D_{7} ins. after 232* following 12. 99. 10 : S after 12. 99. 11 :

ऐश्वर्यमीदृशं प्राप्तः सर्वदेवैः सुदुर्लभम् ।
शक्र उवाच ।
यदनेन कृतं कर्म प्रत्यक्षं ते महीपते ।
पुरा पालयतः सम्यक्पृथिवीं धर्मतो नृप ।
शत्रवो निर्जिताः सर्वे ये तवाहितकारिणः ।
संधमो विधमश्चैव सुधमश्च महाबलः । [5]
राक्षसा दुर्जया लोके त्रयस्ते युद्धदुर्मदाः ।
पुत्रास्ते शतशृङ्गस्य राक्षसस्य महीपतेः ।
अथ तस्मिञ्शुभे काले तव यज्ञं वितन्वतः ।
अश्वमेधं महायागं देवानां हितकाम्यया ।
तस्य ते खलु विघ्नार्थमागता राक्षसास्त्रयः । [10]
कोटीशतपरीवारां राक्षसानां महाचमूम् ।
परिगृह्य ततः सर्वाः प्रजा बन्दीकृतास्तव ।
विह्वलाश्च प्रजाः सर्वाः सर्वे च तत्र सैनिकाः ।
निराकृतस्त्वया चासीत्सुदेवः सैन्यनायकः ।
तत्रामात्यवचः श्रुत्वा निरस्तः सर्वकर्मसु । [15]
श्रुत्वा तेषां वचो भूयः सोपधं वसुधाधिप ।
सर्वसैन्यसमायुक्तः सुदेवः प्रेरितस्त्वया ।
राक्षसानां वधार्थाय दुर्जयानां नराधिप ।
नाजित्वा राक्षसीं सेनां पुनरागमनं तव ।
बन्दीमोक्षमकृत्वा च न चागमनमिष्यते । [20]
सुदेवस्तद्वचः श्रुत्वा प्रस्थानमकरोन्नृप ।
संप्राप्तश्च स तं देशं यत्र बन्दीकृताः प्रजाः ।
पश्यति स्म महाघोरां राक्षसानां महाचमूम् ।
दृष्ट्वा संचिन्तयामास सुदेवो वाहिनीपतिः ।
नेयं शक्या चमूर्जेतुमपि सेन्द्रैः सुरासुरैः । [25]
नाम्बरीषः कलामेकामेषां क्षपयितुं क्षमः ।
दिव्यास्त्रबलभूयिष्ठः किमहं पुनरीदृशः ।

---

